# संस्कृतवार्ताः

दिनाङ्क :- 05.05.2025

प्रात: - 06:55

## प्रधानमन्त्री - खेलोइण्डिया इति

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् तस्य प्रशासनं षट्त्रिंशदधिक - द्विसहस्र- तमवर्षीयाया: ओलम्पिकक्रीडाया: प्राक् भारतं खेल-महाशक्तित्वेन निर्मातुं प्रतिबद्धं वर्तते। खेलो- इण्डिया- यूथ-गेम्स- इत्येतां उद्घाटयितुम् एकस्मिन् दृश्याङ्कनसन्देशे श्रीमोदी अवदत् यत् तस्य प्रशासनं विगते एकदशके क्रीडाया: आय-व्यय-पत्रे त्रिगुणाधिकीं वृद्धिं समर्जितवत्। आधारभूतावसंरचनासु च परिष्कारं कर्तुं स्वप्रशासनस्य सर्वोच्च प्राथमिकतां प्रकाशयन् असौ निगदितवान् यत् क्रीडायोजनम् सम्प्रति आवर्षं यावत् आयोज्यते। राष्ट्रिय- शिक्षानीत्यापि क्रीडा: मुख्यधाराया: अध्ययनस्य भागं निर्मीय मान्यता प्रदत्तास्ति।

## शाह-संस्कृतायोजनम्

केन्द्रीयगृहमन्त्रिणा अमितशाहेन प्रोक्तं यत् जनैः संस्कृतभाषाध्ययनं अभ्यासश्च करणीयः यतो हि भारतस्य सर्वमपि ज्ञानं संस्कृतभाषायामेव निहितं वर्तते। सः अवदत् यत् संस्कृतभाषा जगतः समाह्वानानां समाधानाय मार्गदर्शनं कर्तुं शक्नोति। गृहमन्त्री नवदिल्ल्यां संस्कृतभारत्या आयोजितानाम् अष्टोत्तरैकसहस्र-संस्कृतसम्भाषणशिबिराणां समापनकार्यक्रमं सम्बोधयन् एवम् उक्तवान्। संस्कृतभाषायाः महत्त्वं बोधयन् श्रीशाहः अवदत् यत् संस्कृतभाषा अधिकांशभाषाणां जननी अस्ति। सः अवदत् यत् देशे संस्कृतस्य प्रचारार्थं प्रशासनं कार्यं कुर्वदस्ति।

## आईसीएआर-तण्डुल इति

कृषिमन्त्रिणा शिवराजसिंहचौहानेन नवदिल्ल्यां भारतीय- कृष्यनुसन्धान-परिषदा विकसितस्य भारतस्य जीनोम सम्पादितस्य तण्डुलस्य प्रथमप्रकारद्वयम् प्रसारितम्। आयोजनं सम्बोधयन् मन्त्री अवदत् यत् अद्य भारतस्य कृते ऐतिहासिकः दिवसो अस्ति। द्वयो: प्रकारयोः देशे उत्पादनव्ययः न्यूनीभविष्यति, देशे तण्डुलानाम् उत्पादनं च वर्धयिष्यते इति सः अवदत्। श्री चौहान:

अस्यां परियोजनायां संलग्नेभ्य: कृषिवैज्ञानिकभ्य: अभिनन्दनं कृत्वा देशस्य कृषिवैज्ञानिकानां क्षमतायां विश्वासोऽपि वर्तते इति उक्तवान्।

## निर्मला-सीतारामन्-इत्येषा

केन्द्रीयवित्तमन्त्री निर्मलासीतारामन् इत्येषा एशियाई- विकास-बैंक-इत्येतस्य बोर्ड-ऑफ- गवर्नर्स- इत्यस्य अष्टपञ्चाशत्तमे वार्षिकोपवेशने भागं स्वीकर्तुं वित्तमन्त्रालयस्य आर्थिक-विषयक- विभागस्य अधिकारिणां भारतीय-प्रतिनिधिमण्डलस्य नेतृत्वं विधास्यति। चतुर्दिवसीयम् एतत् उपवेशनम् इटलीदेशस्य मिलन् नगरे समायोज्यते।

## रक्षामन्त्री-सम्मेलनम्

रक्षामन्त्री राजनाथसिंह: अद्य नवदिल्ल्यां जापानदेशीयेन स्वसमकक्षेण श्री जनरल-नाकातानी इत्यमुना साकं द्विपक्षीयोपवेशनं समनुष्ठास्यति। रक्षामन्त्रालयेन एकस्मिन् वक्तव्ये प्रतिपादितं यत् उपवेशनावधौ उभौ पक्षौ वर्तमान-क्षेत्रीय-सन्दर्भे अन्ताराष्ट्रिय-सुरक्षा- स्थित्यामपि च विचाराणाम् आदानप्रदानमपि करिष्यत: अथ च द्विपक्षीयं रक्षासहयोगं वर्धयितुं विविधेषु उपायेषु चर्चामपि विधास्यत:।

## तेलङ्गाना- गडकरी

केन्द्रीय-मार्गपरिवहन- राजमार्ग-मन्त्री नितिन-गडकरी अद्य तेलङ्गाना- राज्ये षट्सहस्र-कोटि रूप्यकाणां व्ययेन निर्मितानां चतुर्दश राष्ट्रियराजमार्ग- परियोजनानां पञ्चाशीत्यधिक-द्विशत- किलोमीटर-परिमितानाम् उद्घाटनं करिष्यति। असौ अद्य सायंकाले हैदराबादनगरे भेलइत्येतस्य अम्बरपेट- इत्येतस्य उपरिगामि- पथस्यापि उद्घाटनं करिष्यति।

## आई.पी.एल्

आई.पी.एल्. इत्येतस्यां क्रिकेट-स्पर्धा-मालिकायाम् गतरात्रौ धर्मशालायां पंजाबकिंग्स-दलेन गतरात्रौ लखनऊसुपरजायंट्स-दलम् सप्तत्रिंशत्धावनाकै: पराजितम्। तत्रैव अद्य सनराइजर्सहैदाराबाद-डेल्हीकैपिटल्सदलयो: मध्ये प्रतिस्पर्धा भविष्यति। क्रीडैषा सायंकाले सार्धसप्तवादनत: क्रीडिष्यते।